अङ्क-२६
जुलाई-दिसम्बर २०१५
**वेदविद्या**
ISSN-2230-8962

# वैदिक-शिक्षा व्यवस्थायाः वैज्ञानिकदृष्टिकोणम्

**दीपक कुमार शर्मा**

**"सर्वज्ञानमयो हि सः वेदा एव विश्वस्य विश्वेषां ज्ञानविज्ञानानां मूलाधाराः वर्तन्ते यतः वेदाः स्थानानि विद्यानाम्"** इति । ज्ञान लाभसत्ताविचारार्थकः वेद् शब्दः कृतयुगादारभ्य सम्प्रत्यपि विश्वेषु आजस्त्रमप्रवहन्तः स्वकीयज्ञानवैपुल्येन सर्वविध परापराज्ञानेभ्य जनान्युपकरोति। शिक्ष् विद्योपादाने इत्यनेन तध्यानामर्धग्रहणमेव शिक्षा अतः वेदेषु वर्णित ज्ञान-विज्ञानपरपरासामाजिकराष्ट्रिय-तध्यानामन्विष्य दैनिकजीवनेषु प्रयोग एव शिक्षेति शास्त्राण्यधीत्यापि भवन्ति मूर्खाः यस्तु क्रियावान् पुरुषः स विद्वान् । कस्यापि देशस्य राष्ट्रस्य वा समुन्नतेः मूलाधारो भवति शिक्षा । साक्षात् प्रमाणमस्त्यस्माकं भारतीयसंस्कृतेः पुरातनी शिक्षा व्यवस्था यया वेदा एव विश्वस्य प्राचिनतमाः ज्ञाननिधयः । वैदिकयुगो भारतीयसभ्यताया आरम्भाद् बुध्दजन्म-पर्यन्तं मन्यन्ते विद्वद्भिः। वैदिकं साहित्यं बृहत्कायं वर्तते । एतस्मिन् वेदैः सह वेदाङ्गानि उपनिषदश्च सर्वे समायान्ति । शिक्षा नाम सनातनी परम्परा वर्तते भारतवर्षे । शिक्षायाः सम्बन्धः वैज्ञानिकसिद्धान्तैः समाश्रित आसीत्। ब्राह्मणक्षत्रियवैश्यशूद्रनामधेयाः चत्वारो वर्णाः ब्राह्मणाः सृष्यः –

**ब्राह्मणोऽस्य मुखमासीत् च्द्राहू राजन्यः कृतः।**
**ऊरु तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत॥**[१]

एतेषां निर्धारणं सोद्देश्यमासीत् –

**ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यं मरुद्भयो वैश्यं तपसे शूद्रम्॥**
**जायमानाः मानवाः कर्मानुसारम् उच्चैर्भवितुमशक्नुवन्।**[२]

उक्तं च महाभारते –

**न विशेषोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगद्।**
**ब्रह्मणा ब्रह्म सृष्टं हि कर्मभिर्वर्णतां गतम्॥**[३]

**(१) गुरुकुलव्यवस्था -**

प्राचीन भारते ऋषीणां आश्रमेऽस्मिन्नेव विद्यालयाः आसन् । तत्र सुरम्य वातावरणे वेदादीनां अध्ययनं भवति स्म । तत्रत्य वातावरणस्य इयमपि विशेषता आसीत् यत् तत्र काऽपि भोगस्य व्यवस्था

[१] ऋग्वेदः १०/९०/१२
[२] यजुर्वेदः ३०/५
[३] शान्तिपर्वः, महाभारत्म् ।

नाऽसीत् । तत्रत्य विद्यार्थी ब्रह्मचर्यपूर्वकंत्यागपूर्ण जीवनम् व्यापयति स्म। भोजनादि व्यवस्था- कृषि-व्यवस्थायामपि विद्यार्थीणां महत्त्वपूर्ण योगदानं भवति स्म यतो हि छात्राणां जीवने आलस्य-प्रमादादि दुर्गुणानां समावेशः न भवेत् ।

पाश्चात्त्य विद्वांसः स्किनर, मॉरीसन आदिभिः वातावरणस्य विषये उक्तवन्तः यत् "बालकस्य सम्पूर्ण जीवनविकासाय, योग्यतावृध्य्यर्धं च वंशानुक्रम – वातावरणस्य अतीव महती भूमिका अस्ति॥"

**(२) अध्ययनक्रमः –**

भारतीय सनातन परम्परा संस्कारप्रधाना वर्तते । संयुक्ते परिवारे वरिष्ठेभ्यः सदस्येभ्यः बालस्य पञ्चमेवर्षे अक्षराऽऽरम्भो जायते । एतत् **"अक्षरस्वीकरणम्"** इत्यपि उच्यते । पारिवारिकसदस्यैः बालः वर्णानां पदानां लघुगुरुइत्यादीनां लोपागमविकाराणां स्वरितोदात्तानुदात्तादीनां शिक्षणं प्राप्य आचार्यं प्रति गन्तुं योग्यो भवति स्म ।

**गुरुत्वं लघुता साम्यं ह्रस्वदीर्घप्लुतानि च ।**
**लोपागमविकाराश्च प्रकृतिर्विकृतिः क्रमः ॥**
**स्वरितोदात्तनीचत्त्वं श्वासोनादोऽगमेव च ।**
**एतत्सर्व तु विज्ञेयं छन्दोभाषामधीयता॥**
**पदक्रम विशेषज्ञो वर्णक्रमविचक्षणः ।**
**स्वरमात्राविभागज्ञो गच्छेचार्य संसदम्॥**[१]

**(क) उपनयनम् –**

प्रारम्भिक शिक्षायाः पश्चात् उपनयन संस्कार कालो जायते स्म । स तु विविधानां वर्णानां कृते विविधो भवति स्म। ब्राह्मणस्य कृते अष्टमे, क्षत्रियस्य एकादशे, वैश्यस्य च द्वादशे वर्षे । उपनयनान्तरं हि "द्विजाः" इति संज्ञा दधति स्म । त एव वैदिक ज्ञानाय मन्त्रेश्यश्चाधिकारिणो मन्यन्ते येऽनेन संस्कारेण पूता आसन् । उपनयन संस्कारः शरीरं पुनाति मस्तिकञ्च वैदिकज्ञानं धारयितुं योग्यं करोति । वैदिकयुगे परम्परेयमप्यासीत् यद् गुरवो नूतनानां छात्राणां चरित्रपरीक्षणं षण्मासं कुर्वन्ति स्म । यत् छात्रः चरित्रवान् विद्यते न वेति ।

आधुनिक शिक्षाशास्त्रेऽपि "T.A.T., रोर्शा स्याही परीक्षणं" आदि नामकं बुद्धिलब्धि परीक्षणं (I.Q. Test) भवति तेषां मतानुसारं छात्राणां उत्तम-शिक्षाणार्थ, छात्राणां विभाजनं बुद्धिलब्धिपरीक्षणेन भवेत् ।

[१] तैत्तिरीय प्रातिशाख्य २४ ।

वैदिक शिक्षाग्रन्थेषु **"संस्थायाः शिष्य सामर्थ्यम्"** इत्यादि वचनात् ज्ञानं भवति यत् छात्राणां अध्यापकः तेषा योग्यतानुसारं अध्यापयेत् ।

**(ख) समावर्तनम् –**

माणवका आचार्यस्य सन्निधौ दशवर्षीणि, द्वादश वर्षाणि, चतुर्दश वर्षाणि वा उषित्वा विद्यार्जनं परिसमाप्य गृहस्थाऽऽश्रमे प्रवेशाय समुद्यताः भवन्ति स्म। तस्मिन् काले समावर्तनं-गृहं प्रत्यागमनं भवति स्म। समावर्तने ब्रह्मचारी स्नानेन्तरिकं बाह्यञ्च मलं प्रक्षाल्य गुरोः पुरतः उपस्थितो भवति स्म। गुरुः सभायां स्नातकस्य भाविजीवनस्य साफल्याय सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । इत्यादि सन्देशं ददाति स्म । यत् छात्रः गृहस्थ-जीवने प्रविष्यति । सामाजिक जीवने साफल्यार्थं राष्ट्रस्य समुन्नतेश्च सदैव सत्यं वक्तव्यम्, धर्मस्य परिपालनं करणीयम्, सत्ये न प्रमदितव्यम्, धर्मेऽपि न प्रमदितव्यम् ।

अतः सर्वे जनाः यदि वेद-वर्णित धर्मस्य परिपालनं करिष्यन्ति तदा कदाऽपि तस्मिन्देशे आतंकवादस्य, भ्रष्टाचारस्य समस्या न भविष्यति समाजे प्रेम-सहिष्णुतादि गुणानां वृद्धि भविष्यति दुर्गुणानां समावेशोऽपि नैव भविष्यतीति ।

## <u>वैदिकशिक्षायाः उद्देश्यानि</u>

**(१) आचार-शिक्षा चरित्र निर्माणञ्च –** "आचारहीनं न पुनन्ति वेदाः "इत्यदि वचनात् सिद्धयति यत् आचारस्य शुद्धता विषयेऽपित्त्रऋषिभिः योगदानं दत्तम् । शु. यजुर्वेदेऽपि चरित्रशुद्धये मन्त्रः अस्ति –

**"वाचं ते शुन्धामि प्राणं ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रं ते शुन्धामि नाभिं ते शुन्धामि[1] चरित्त्रांस्ते शुन्धामि ॥" श्रेष्ठतायाः हेतु चरित्रमेवाऽसीत् स्वीकृतम् ।**

वैदिकवाङ्मये प्रत्यक्षरूपेण परोक्षरूपेण च चारित्र्यविकासाय अनेके सन्दर्भाः प्राप्यन्ते । शिष्यस्य गुरुणा सह व्यवहारः, गुरोः शिष्येण सह व्यवहारः, पितुःपुत्रेण सह व्यवहारः, पित्रा सह पुत्रस्य व्यवहारः, पितुः पुत्रेण सह व्यवहारः पतिपत्योः मिथो व्यवहारः निदर्शितो वर्तते ।

रामायणादिकाव्यानामपि उद्देश्यं "रामादिवद्व्यवहर्त्तव्यं न रावणावदिति । तपः पूताः ऋषयः स्वचरित्रेणैव मानवान् शिक्षिवन्तः –

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवः ॥**[2]

---

[1] यजुर्वेदः ६.१४ ।
[2] मनुस्मृतिः ।

**(२) बुद्धेः परिष्कार-विकासश्च –** अथर्ववेदानुसारं शिक्षायाः उद्देश्यमस्ति यत्, बुद्धेःविकासः, परिष्करणम्, तीक्ष्णताप्रदानम्, उन्नतिम्, तथा च महान् सौभाग्यस्य प्राप्तिः मन्त्रेऽस्मिन् वर्णितम् – वर्धयैनं ज्योतयैनं महते सौभगाय। **संशितं चित् संतरं सं शिशाधि॥**[1]

**(३) ज्ञान-कर्मश्च समन्वयः –** शिक्षायाः सफलता तदैव भवति, यदा कर्मणि कर्मठता भवेत् । प्रगतिशील – कर्मठ – सतत् संघर्षशील मानवस्य निर्माणमपि वैदिक शिक्षायाः परमोद्देश्यम् मन्त्रे आयाति **"अपनस्वती मम धीरस्तु शक्र।"**[2] अर्थात् मम बुद्धिः सदा कर्मठा भवेत् । देवतापि पुरुषार्थी पुरुषं इच्छन्ति न तु अकर्मण्य-पुरुषम् । **"इच्छन्ति देवाः सुन्वन्तम्"**[3] यजुर्वेदे स्पष्ट रूपेण उक्तं यत् ज्ञानस्य कर्मस्य च समन्वयः अभीष्टमस्ति । यत् कर्मभार्गात् जीवन निर्वाहः, ज्ञानयार्गात् मोक्षं प्राप्नोति पुरुषः । **अविद्यया मृत्युं तीर्त्वा, विद्ययाऽमृतमश्नुते।**[4]

**(४) अध्यात्म-भौतिकवादस्य समन्वयः –** यजुर्वेद ईशोपनिषदस्य कथनमस्ति यत् केवलं भौतिकवादः प्रकृतिवादः वा अनर्थस्य कारणमस्ति, तथा च केवलमेव अध्यात्ममपि अनर्थकारी। अतः समन्वित विकासाय उभयोः समन्वयं आवश्यकमस्ति । अतः समन्वित विकासाय उभयोः समन्वयं आवश्यकमस्ति। भौतिकवादः जीवनस्य समस्याणां समाधानं ददाति अध्यात्यः अमरत्वं, आत्मिक-शान्तिश्च प्रददाति। **"विनाशेन मृत्युं तीर्त्वा, संभूत्याऽमृतमश्नुते॥"**[5]

**(५) अशिक्षायाः उन्मूलनम् –** ऋग्वेदे मन्त्रे वणितमस्ति यत् अज्ञान, अविधायाः निवारणं भवेत्, अन्धविश्वासी, अपराधपृवृत्तीणां दूरीकरणं भवेत् यतः जीवनं सुखमयं भवेत् । **"क्षिपद् अशस्तिम् अप दुर्मतिं हन्नधो करद् यजमानाय शंयोः॥"**[6]

**(६) मोक्ष : -** "सा विद्या या विमुक्तये" इति स्पष्टतया द्योतयति शिक्षोद्देश्यम् ।

अतः सिद्धयति यत् "सर्वं वेदात् प्रसिद्धयति" इति ॥

**दीपक कुमार शर्मा**
अनुसन्धाता
वेदविभागः, सं.विध.वि. काशी हिन्दू वि.वि,
वाराणसी

[1] अथर्ववेदः अ. ७.१६.१ ।
[2] अथर्ववेदः अ. २०.८३.३ ।
[3] अथर्ववेदः अ. २०.१८.३ ।
[4] यजुर्वेदः ४०.१४ ।
[5] यजुर्वेदः ४०.११ ।
[6] ऋग्वेदः १०.१८२.३ ।